**CLASS : 12th** (Sr. Secondary) **Code No. 5605**

**Series : SS-April/2021**

*Roll No.* | | | | | | | | | | |

***SET : C***

# संस्कृत

## SANSKRIT

## भाग – I

(आत्मनिष्ठ प्रश्न)

***ACADEMIC/OPEN***

(Only for Fresh/Re-appear Candidates)

*समय : $2\frac{1}{2}$ घण्टे ]* *[ पूर्णांक : 80* (भाग–I : 40, भाग–II : 40)

प्रश्न-पत्र दो भागों में विभाजित है : भाग–I (आत्मनिष्ठ) एवं भाग–II (वस्तुनिष्ठ)। परीक्षार्थी को दोनों भागों के प्रश्नों के उत्तर को अपनी उत्तर पुस्तिका में लिखना है। प्रश्न-पत्र का भाग–I परीक्षा आरम्भ होने पर पहले उत्तर-पुस्तिका के साथ दिया जाएगा तथा भाग–II के लिए आखिरी का एक घंटे का समय दिया जाएगा अर्थात् परीक्षा समाप्त होने से एक घंटा पूर्व परीक्षार्थी को भाग–II का प्रश्न-पत्र दिया जाएगा।

भाग–I के प्रश्न-पत्र में कुल 9 प्रश्न एवं भाग–II के प्रश्न-पत्र में कुल 36 प्रश्न हैं।

- *कृपया जाँच कर लें कि **भाग–I** के इस प्रश्न-पत्र में मुद्रित पृष्ठ **4** तथा प्रश्न **9** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/ पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



https://www.haryanaboard.com/

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठितम् अवबोधनम्)**

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

इह संसारे सर्वेषु वस्तुषु समयः अधिको मूल्यवान् वस्तु वर्तते। अन्यवस्तूनि विनष्टानि पुनरपि लब्धुं शक्यन्ते परं समयः विनष्टः केनापि उपायेन पुनः प्राप्तुं न शक्यते। अस्य आयुषः यावान् अंशः निरर्थकं गतः स गतः एव। अतः तथा प्रयतितव्यं यथा एकस्यापि क्षणस्य दुरुपयोगः न स्यात्। समस्तः एव समयः समुचितरूपेण व्यतीतः भवेत्। समयः कस्यापि प्रतीक्षां न करोति। अनेके जनाः द्यूते, विवादे, वृथा भ्रमणे, पिशुनतायां निद्रायां च समस्तं समयं नयन्ति। ते निजजीवनस्य बहुमूल्यम् अंशं वृथा यापयन्ति। समयस्य सदुपयोगः जीवने सफलतायाः प्रथमसोपानम् समुन्नतेः च मूलमन्त्रोऽस्ति। प्रकृतिः अपि समयस्य सदुपयोगमेव शिक्षयति। ये जनाः समयस्य दुरुपयोगं न कुर्वन्ति ते सदा सुखेनैव तिष्ठन्ति।

अतः आलस्यं विहाय सर्वदैव समयस्य सदुपयोगः कर्तव्यः। उक्तं च 'क्षिप्रमक्रियमाणस्य कालः पिबति तद् रसम्'।

***प्रश्नाः*** – $5 \times 2 = 10$

(क) का समयस्य सदुपयोगं शिक्षयति ?

(ख) किं विहाय सर्वदैव समयस्य सदुपयोगः कर्तव्यः ?

(ग) अनेके जनाः समयं कथं यापयन्ति ?

(घ) अस्मिन् संसारे अधिको मूल्यवान् वस्तु किं वर्तते ?

(ङ) समयस्य सदुपयोगः जीवने कस्याः प्रथमसोपानम् ?

**खण्डः 'ख'**

**(रचनात्मकं कार्यम्)**

**2.** ***विषयमेकमधिकृत्य*** लघुनिबन्धं संस्कृतभाषया रचयत – $1 \times 3 = 3$

(क) संस्कृतभाषायाः महत्त्वम्

(ख) स्वामी विवेकानन्दः।

(ग) मम प्रियः कविः।



https://www.haryanaboard.com/

## खण्डः 'ग'

### (पठितम् अवबोधनम् )

**3.** अधोलिखितासु सूक्तिषु ***एकस्या*** सूक्त्याः भावार्थं हिन्दीभाषया लिखत – 1 × 3 = 3

(क) विद्ययाऽमृतमश्नुते।

(ख) योगः कर्मसु कौशलम्।

(ग) दिदेश कौत्साय समस्तमेव।

**4.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थः कार्यः – 1 × 5 = 5

श्रीनायारः केन्द्रसर्वकारतः स्थानान्तरणेन आगत्य ओडिशासर्वकारस्य अधीने प्रायः वर्षत्रयेभ्यः कार्यं करोति। तथाप्यस्मिन् वर्षत्रयात्मके कालखण्डे एकवारमपि स्वराज्यं केरलं प्रति गमनाय इच्छां न प्रकटितवान्।

**अथवा**

पुनरपि राजा सिंहासने समुपवेष्टुं गच्छति। ततः अन्या पुत्तलिका समवदत् – 'भो राजन् ! एतत्सिंहासने तेनैव अध्यासितव्यं यस्य विक्रमतुल्यम् औदार्यमस्ति।'

**5.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थः कार्यः – 1 × 5 = 5

(क) असुर्या नाम ते लोका अन्धेन तमसावृताः।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।

**अथवा**

(ख) स मृण्मये वीतहिरणमयत्वात्
पात्रे निधायार्ध्यमनर्घशीलः।
श्रुतप्रकाशं यशसा प्रकाशः
प्रत्युज्जगामातिथिमातिथेयः।।

## खण्डः 'घ'

### (संस्कृतसाहित्यस्य परिचयः)

**6.** बाणभट्टस्य ***अथवा*** श्रीचन्द्रशेखरवर्मणः संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 1 × 5 = 5

**7.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** पुस्तकस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः – 1 × 5 = 5

(क) रघुवंशम्

(ख) गीता



https://www.haryanaboard.com/

## खण्डः 'ङ'

## (छन्दोऽलङ्कारयोः परिचयः)

**8.** अधोलिखितेषु छन्दस्सु ***एकस्य*** छन्दसः संस्कृतभाषया लक्षणं लिखत – 1 × 2 = 2

(i) अनुष्टुप्

(ii) उपेन्द्रवज्रा

(iii) वसन्ततिलका

**9.** अधः प्रदत्तेषु अलङ्कारेषु ***एकस्य*** अलङ्कारस्य लक्षणं संस्कृतभाषया लिखत – 1 × 2 = 2

(i) अनुप्रासः

(ii) अर्थान्तरन्यासः

(iii) रूपकम्



https://www.haryanaboard.com/